# शिवसंकल्प सूक्तम्

१ . यज्जाग्रतो दूरमुदैति दैवं तदू सुप्तस्यतथैवेति

दूरंगमम् ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु।। १ ।।

उव्वटभाष्यः-

षट्कण्डिकास्त्रिष्टुभो मनोदेवत्याः । अस्मिन् अध्याये लैङ्गिको विनियोगः। लिंगं च सामर्थ्यमुच्यते । अभिधानशक्तिः । यन्मनः जाग्रतः पुरुषस्य दूरम् उदेति उद्गच्छति चक्षु:प्रभृतीन्यपेक्ष्या यच्च दैवं देवो विज्ञानात्मा सोत्नेन गृह्यते इति दैवम्। उक्तंच मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवमिति । तदु सुप्तस्य तदः स्थाने यदो वृत्तिः । उकारः समुच्चयार्थीयः । यच्च मनः सुप्तस्य तथैव तेनैव प्रकारेण एति । यच्च दू रं गमम्। अतीतानागतवर्तमानव्यवहृतविप्रकृष्टगृहीतृ। ज्योतिषां श्रोत्रादीनां विज्ञाननेतृणां मध्ये एकमेव ज्योतिः । तत् मे मनः शिवसंकल्पं । संकल्पः काममूलपदार्थस्य स्त्र्यादेः सुरूपताज्ञानवतः कामप्रभृतिः । शान्तसंकल्पमस्तु।

महीधरभाष्यः-

ऋषिर्वदति - तन्मे मनः शिवसंकल्पमस्तु - शिवः कल्याणकारी धर्मविषयः संकल्पो यस्य तत् तादृशं भवतु - मनसि सदा धर्म एव भवतु न कदाचित् पापमित्यर्थः । तत्किम्- यत् मनो जाग्रतः पुरुषस्य दूरमुदैति । यच्च दैवं दीव्यति प्रकाशते इति देवो विज्ञानात्मा । तत् उ यदः स्थाने तच्छब्दः उकारश्चार्थः। यच्च मनः सुप्तस्य पुंसः तथैव एति यथा गतं तथैव पुनरागच्छति - स्वापकाले सुषुप्तावस्थायां पुनरागच्छति । यच्च दूरंगमं दूरं गच्छतीति खश् प्रत्ययाः। यच्च मनो ज्योतिषां प्रकाशकानां श्रोत्रादीन्द्रियाणामेकमेव ज्योतिः प्रकाशकं प्रवर्ततकमित्यर्थः। प्रवर्तितान्येव श्रोत्रादीन्द्रियाणि स्व स्व विषये प्रवर्तन्ते । आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थैनेति न्यायोक्तेर्मनः सम्बन्धमन्तरा । तेषामप्रवृत्तेः । तादृशं मे मनः शिवसंकल्पमस्तु ।

२.        येनकर्मान्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।

यदपूर्वं यक्षमन्तःप्रजानां तन्मे मनः शिवसंकल्पमस्तु ।।२।।

उव्वटभाष्यः-

येन कर्माणि । येन मनसा सता कर्माणि अपसः अप इति कर्मणां तद्धितलोपः। अपस्विनः कर्मवतः । मनीषिणः मेधाविनः । यज्ञे कृण्वन्ति कुर्वन्ति । विदथेषु वेदनेषु यज्ञविधिविज्ञानेषु धीराः धीमन्तः। यच्च अपूर्वम् । न विद्यते पूर्वमिन्द्रियं यस्मात्तदपूर्वं यद्वा अपूर्व मनपरं यच्च अन्तर्मध्ये प्रजानामास्ते । तस्मै मनः शिवसंकल्पमस्तु ।

महीधरभाष्यः-

मनीषिणः मेधाविनः यज्ञे येन मनसा मता कर्माणि कृण्वन्ति कृ करणे स्वादिः मनः स्वास्थ्यं विना कर्माप्रवृत्तेः । केषु सत्सु विदथेषु ज्ञानेषु सत्सु विद्यन्ते । ज्ञायन्ते तानि विदानि तेषु वेत्तेरौणादिको थ प्रत्ययः - प्रत्ययोदात्तत्वेन मध्योदात्तम् । पदं प्रत्ययः परश्च आद्युदात्तश्चेति पाणिन्युक्तेः। यज्ञसम्बन्धीनां ज्ञानेषु सत्स्वित्यर्थः । कीदृशा मनीषिणः - अपसः - अप इति कर्मनाम -अपोविद्यते अपस्विनः - अस् मायामेधास्रजो विनिः- इति विनिः । तथा धीराः धीमन्तः धीर्विद्यते एषां ते इति कर्मण्यन् । मनः अपूर्वम्। इन्द्रियेभ्यः पूर्वं मनसः सृष्टे : यद्वा अपूर्वमनपरं वाह्यमित्युक्तेरपूर्वमात्मपरं इत्यर्थः । यच्च प्रजायन्ते इति प्रजास्तासां प्राणिमात्राणामन्तः शरीरमध्ये आस्ते इतरेन्द्रियाणि - वहिःष्ठानि मनस्त्वन्तुरिन्द्रियमित्यर्थः । तत् तादृशं मे मनः शिवसंकल्पमस्तु ।

३.        यत् प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।

यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ।।३।।

उव्वटभाष्यः-

यत्प्रज्ञानं यन्मनः प्रज्ञानं विशेषप्रतिपत्तिप्रज्ञाम्। उत अपि च चेतेः । सामान्य प्रतिपत्तिश्चेतः धृतिश्च प्रसिद्धा । यन्मनः अन्तर्ज्योतिरमृतंच प्रजासु । यस्मान्न ऋते च विना न किंचन कर्म क्रियते । तन्मे मनः शिवसंकल्पमस्तु ।

महीधरभाष्यः-

यत् मनः प्रज्ञानं विशेषेण ज्ञानजनकम् प्रकर्षेण ज्ञायते येन तत् प्रज्ञानम् । करणाधिकरणयोश्चेति इति करणे ल्युट् प्रत्ययः । उत अपि यत् मनः चेतः चतेयति सम्यक् ज्ञापयति तच्चेतः चिति संज्ञाने तस्मात् ण्यन्तादसून् प्रत्ययसामान्यविशेष ज्ञानजनकं इत्यर्थः। यच्च मनो धतिर्धैर्यरूपं मनस्येव धैर्योत्पत्तेर्मनसि धैर्यमुपचर्यते कार्यकारणयोरभेदात् । यच्च मनः प्रजासु जनेषु अन्तर्वर्तमानं सज्योतिः प्रकाशकं सर्वेन्द्रियाणां उक्तमपि पुनरुच्यते आदरार्थ अभ्यासे भूयां समर्थं मन्यन्त इति यास्कोक्तेः। यच्चामृतममरणधर्मी आत्मरूपत्वात् । यस्मान् मनसः ऋते यन्मनो विना किंचन कर्म न क्रियते जनैः सर्वकर्मसु प्राणिनां मनः पूर्वं प्रवृत्तेर्मनः स्वास्थ्यं विना कर्माभावादित्यर्थः ।

४. येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ।।४।।

उव्वटभाष्यः-

येन मनसा इदं भूतं भूतकालम् । भुवनं वर्तमानं कालम् । भविष्यत्कालंच परिगृहीतम् - अमृतेन सर्वं येन - च मनसा यज्ञस्तायते तन्यते सप्तहोता । सप्तहोतारो ह्यग्निष्टोमे भवन्ति । तन्मे मन इति व्याख्यातम् ।

महीधरभाष्यः-

येन मनसा इदं सर्वं परिगृहीतं परितः सर्वतो ज्ञानम् । इदं किम्भूतं - भूतकालसम्बन्धि वस्तु । भुवनं भवतीति भुवनं भवतेः क्यु प्रत्ययः

वर्तमानकालसम्बन्धिः। भविष्यत् लृटः सद्वेति शतृप्रत्ययः तौ सदित्युक्तेः । त्रिकालसम्बन्धवस्तुषु मनः प्रवर्तते इत्यर्थः। श्रोत्रादीनि तु प्रत्यक्षमेव गृह्णन्ति । कीदृशेन येन । अमृतेन शाश्वतेन मुक्तिपर्यन्तं श्रोत्रादीनि नश्यन्ति मनस्त्वनश्वरमित्यर्थः । येन च मनसा यज्ञोग्निष्टोमादिः तायते विस्तार्यते तनोतेर्यकिति आकारः । कीदृशो यज्ञः- सप्त होता सप्त होता देवानामाह्वातारो होतृमैत्रावरुणादयो यत्र स सप्तहोता अग्निष्टोमे सप्तहोतारो भवन्ति । तन्मे मनः शिवसंकल्पमस्तु इति भावः ।

५. यस्मिन् ऋचः साम यजूंषि यस्मिन् प्रतिष्ठिता रसनाभाविवाराः।

यस्मिन्श्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ।।५।।

उव्वटभाष्यः-

यस्मिन् ऋचः यस्मिन् मनसि ऋचः प्रतिष्ठिताः । यस्मिन् सामानि प्रतिष्ठितानि । यस्मिन् यजूंषि प्रतिष्ठितानि । कथमिव - रथनाभौ इवाराः । यस्मिन् चित्तं संज्ञानं सर्वं तस्य तस्यार्थस्य । ओतन्निक्षिप्ततं तन्तुसंततमिव कृतं प्रजानाम् । तन्मे मन इति ।

महीधरभाष्यः-

यस्मिन् मनसि ऋचः प्रतिष्ठिताः यस्मिन् साम सामानि प्रतिष्ठितानि यस्मिन् यजूंषि प्रतिष्ठितानि । मनसः स्वास्थ्ये एव वेदत्रयस्य स्फूर्तेर्मनसि शब्दमात्रस्य प्रतिष्ठितत्वम् । अन्नमयं हि सोम्यमनः- इति छान्दोग्ये मनस एव स्वास्थ्ये वेदोच्चारणशक्तिः प्रतिपादिता। अत्र दृष्टान्तः रथनाभौ आरा इव यथा आरा रथचक्रनाभौ मध्ये प्रतिष्ठितास्तद्वच्छब्दजालं मनसि । किंच प्रजाानां सर्वं चित्तं ज्ञानं सर्वपदार्थविषयी ज्ञानं यस्मिन् मनसि ओतं प्रोतं निक्षिप्तं तन्तुसंततिः पटे इव सर्वं ज्ञानं मनसि निहितं - मनः स्वास्थे एव ज्ञानोत्पत्तिर्मनो वैराग्ये ज्ञानाभावः । तन्मे मनः शिवसंकल्पमस्तु इति भावः ।

६ . सुसारथिरश्वानिव यन्मनूष्यान्नेनीयतेभीशुभिवाजिन इव ।

हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ।।६ ।।

उव्वटभाष्यः-

सुसारथिः । यन्मनः मनुष्यान् । नेनीयते अत्यर्थन्नयति। कथमिव सुसारथिः । कल्याणसारथिः अश्वान् इव । यन्मनूष्यान् यच्च मनः सुसारथिरिव । अभीशुभिः प्रग्रहैः वाजिन इव वेजनवतोश्वानिव । यमयतीति शेषः। द्वे उपमे एकत्र नयनमन्यत्र नियमनमित्यर्थः यच्च हृत्प्रतिष्ठम् । अत्रोपलब्धेः यच्च अजिरजरारहितं यच्च जविष्ठं । अतिशयेन गन्तृ- तन्मे मनः शिवसंकल्पमस्तु ।

महीधरभाष्यः-

यत् मनो मनूष्यान्नेनीयते अत्यर्थ मितस्ततो नयति नयतेः क्रियासमभिहारे यङ् । मनः प्रेरिता एव प्राणिनः प्रवतन्ते मनुष्यः ग्रहणं प्राणिमात्रोपलक्षणम् । अत्र दृष्टान्तः -सुसारथिः अश्वानिव सुशोभनः सारथिर्यन्ता यथा काशया अश्वान् नेनीयते । द्वितीयो दृष्टान्तः- अभीशुभिः वाजिन इव यथा सुसारथिरभीशुभिः प्रग्रहैः वाजिनोश्वान्नेनीयत इत्यनुषङ्गः रश्मिभिर्नियच्छतीत्यर्थः । उपमाद्वयं प्रथमायां नयनं द्वितीयायं नियमनम् तथा मनः प्रवर्तयति नियच्छति न नरानिति । यच्च मनः अजिरं जरारहितं बाल्ययौवन स्थविरेषु मनसस्तदवस्थत्वात् । यच्च जविष्ठं अतिजववद्वेगवत् जविष्ठं न वै वातात् किंचनाशीयोस्ति न मनसः किंचनाशीयोस्तीति श्रूतेः । तन्मे मनः शिवसंकल्पमस्तु ।

—————————————